अद्येत्यादि वैशाखे मासि अमुकपक्षे अमुकतिथौ महाविषुवसंक्रान्त्यां अमुकगोत्रा श्रीअमुकी देवी यमालयगमननिवारणपूर्व्वकश्रीविष्णुप्रीतिकामा अद्यारभ्य वर्षचतुष्टयं यावत् प्रतिवर्षीयमेषस्थरवौ प्रत्यहं गणपत्यादिनानादेवतापूजापूर्व्वक-श्रीविष्णुपूजा-सभोज्यघटदान-कथाश्रवण-ब्राह्मणभोजनरूपधर्म्मघटव्रतमहं करिष्ये ॥ * ॥ वारान्तरे अद्येत्यादि महाविषुवसंक्रान्त्यां मत्संकल्पितधर्म्मघटव्रतकर्म्मणि यथाविधिकगणपत्यादिनानादेवतापूजापूर्व्वकं श्रीविष्णुपूजासभोज्यघटदानकथाश्रवणमहं करिष्ये। इति सङ्कल्प्य तत्सूक्तं पाठयेत् । ततो ब्राह्मणः प्रतिनिधीभूतः सामान्यार्घ्यासनशुद्धिभूतशुद्ध्यादिकं विधाय शालग्रामादौ घटे वा गणेशादीन् नवग्रहान् दिक्पालांश्च संपूज्य वां हृदयाय नमः इत्याद्यङ्गन्यासकरन्यासौ कृत्वा ॐ ध्येयः सदा इत्यादिना विष्णुं ध्यात्वा स्वशिरसि पुष्पं दत्त्वा मानसोपचारैः संपूज्यार्घ्यं संस्थाप्य पुनर्ध्यात्वावाह्य षोड़शोपचारैः ॐ भगवते विष्णवे नम इति मन्त्रेण संपूज्य यथाशक्ति ॐ विष्णवे नम इति मन्त्रं जप्त्वा जपं समर्प्य ॐ नमो ब्रह्मण्यदेवायेत्यादिना प्रणम्य लक्ष्मीं सरस्वतीं आवरणदेवताश्च पूजयेत्। ततः एते गन्धपुष्पे ॐ सभोज्यवारिपूर्णघटाय नमः । इति त्रिरभ्यर्च्य—

“ॐ घट त्वं धर्म्मरूपोऽसि ब्रह्मणा निर्म्मितः पुरा।
त्वयि लिप्ते सन्तु लिप्ताश्चन्दनैः सर्व्वदेवताः ॥”

इति चन्दनेनानुलिप्य अद्येत्यादि अमुकगोत्रा श्रीअमुकी देवी श्रीविष्णुप्रीतिकामा धर्म्मघटव्रतकर्म्मणि इमं सभोज्यवारिपूर्णघटमर्च्चितं श्रीविष्णुदैवतं यथासम्भवगोत्रनाम्ने ब्राह्मणायाहं ददे। इत्युत्सृज्य कृताञ्जलिः पठेत् ।

“ॐ धर्म्म त्वं घटरूपेण ब्रह्मणा निर्म्मितः पुरा।
त्वयि दत्तेऽक्षया लोका मम सन्तु निरामयाः ॥
यथा त्वं शीतलो नित्यं संपूर्णः शीतवारिणा ।
तथा मां सुरशार्दूल ! शीतलं कुरु धर्म्मराट् ॥
एष धर्म्मघटो दत्तो ब्रह्मविष्णुशिवात्मकः ।
अस्य प्रदानात् सफला मम सन्तु मनोरथाः ॥
पानीयं प्राणिनां प्राणाः पानीयं पावनं महत् ।
पानीयस्य प्रदानेन तृप्तिर्भवतु शाश्वती ॥”

इति पठित्वा दक्षिणां दत्त्वाच्छिद्रावधारणं कृत्वा कथां शृणुयात् ॥ * ॥

अथ कथा । श्रीकृष्ण उवाच ।

“शृणु राजन् ! प्रवक्ष्यामि व्रतानां व्रतमुत्तमम् ।
चन्द्रकेतुरिति ख्यातो राजासीद्धार्म्मिकः सुधीः ॥
सुशीला तस्य भार्य्यासीत् मालावत्यतिविश्रुता ।
सा सर्व्वगुणसंयुक्ता साध्वीयं द्रौपदी यथा ॥
एकस्मिन् समये राजन् ! लोमशस्य च सन्निधौ ।
सैषा पुटाञ्जलिर्भूत्वा लोमशं परिपृच्छति ॥

मालावत्युवाच ।

शृणु त्वं मुनिशार्दूल ! सर्व्वधर्म्मपरायण ! ।
यमालयं न गच्छामि तदुपायं ब्रवीहि मे ॥
समाख्याहि व्रतं देव ! सफलं पापनाशनम् ॥

लोमश उवाच ।

शृणु राज्ञि! महाभागे ! येन तत्र न गच्छति ।
तदुपायं प्रवक्ष्यामि शृणु त्वं हि समाहिता ॥
जन्मजन्मकृतात् पापान्मुच्यते नात्र संशयः ।
विष्णुस्मरणमात्रेण हन्ति पापं पुराकृतम् ॥
येन धर्म्मप्रसादेन तुष्टो देवो जनार्द्दनः ।
पूजयेद्देवदेवेशं सर्व्वकामफलप्रदम् ॥
समारोप्य ततो देवं चन्दनेन विलेपितम् ।
पूजयेत् परया भक्त्या गन्धपुष्पादिभिस्तथा ॥
अयने कोटिगुणितं लक्षं विष्णुपदीषु च ।
षड़शीतिसहस्रन्तु षड़शीत्यामुदाहृतम् ॥
विषुवे शतसाहस्रं व्रतं तच्च समाचरेत् ॥

मालावत्युवाच ।

समेतत् कथितं सर्व्वं यद्व्रतञ्च त्वया प्रभो ! ।
किं विधानं फलं किं वा केन लोके कृतं पुरा ॥

लोमश उवाच ।

शृणु देवि ! महाभागे ! पूर्व्वकालस्य या कथा।
विनिष्क्रान्ते ततश्चैत्रे यदा मेषगतो रविः ॥
दोषादिरहिते काले चतुर्व्वर्षं समाचरेत् ।
तत्र नित्यं घटं दद्यात् मासमेकं सभोज्यकम् ॥
चन्दनेन समालिप्तं दक्षिणादिभिरन्वितम् ।
व्रतमेतत् समाकुर्य्यात् यावत् वर्षचतुष्टयम् ॥
अनेनैव विधानेन या व्रतञ्च समाचरेत् ।
सर्व्वं कुलं समुद्धृत्य स्वर्गलोके महीयते ॥
द्रौपद्याचरितं यच्चत् शृणु त्वं ध्यानतत्परा ।
द्रौपद्या तदिदं पूर्व्वं न कृतं व्रतमुत्तमम् ॥
मृता गता च सा साध्वी न लभेत दिवं पुनः ।
अथ शीघ्रं समागत्य ताम्रपुर्यमकिङ्कराः ॥
विषुवे च त्वया साध्वि ! न कृतं तद्व्रतं किल ।
ततो मरणकाले स्यात् स्वर्गद्वारं विरोधितम् ॥
यमदूतैः समुत्पाद्य गले पाशो निवेशितः ॥

द्रौपद्युवाच ।

के यूयमिति तद्ब्रूत कुत्र वा नीयतेऽधुना ।
कथं पाशो गले दत्तः कथयस्व मम ध्रुवम् ॥

यमदूता ऊचुः ।

मा भैषीर्नीयसे देवि ! धर्म्मराजस्य सन्निधौ ।
पृथिव्यां यानि तीर्थानि व्रतानि विविधानि च ॥
यज्ञदानविधानञ्च त्वया सर्व्वं प्रतिष्ठितम् ।
किन्त्वत्र न कृतं पूर्व्वं माधवे मासि सुव्रते ! ॥
व्रतं धर्म्मघटं नाम तेन यासि यमालयम् ॥

द्रौपद्युवाच ।

यमदूता महाभागा नयन्तु मां यमालयम् ।
तत्प्रसादेन मे शीघ्रं गले पाशो विमुच्यतु ॥
ततो विधृत्य स्वकरे समानीता यमान्तिकम् ॥

यम उवाच ।

शृणु त्वं द्रौपदी साध्वि! सर्व्वं त्वया प्रतिष्ठितम्।
न कृतो देवदेवस्य व्रतं धर्म्मघटस्त्वया ॥
तथापि तुष्टो भद्रेऽहं वरं वृणु यथेप्सितम् ॥

द्रौपद्युवाच ।

वरं दत्स्व मे नाथ ! गच्छामि पुनरालयम् ।
कर्त्तव्यं तद्विधानेन व्रतं तव प्रसादतः ॥

यम उवाच ।

व्रतं धर्म्मघटं देवि ! कुरु गत्वा निजालयम् ।
नागन्तव्यं त्वया देवि ! पुनर्म्मम पुरीं शुभे ! ॥
ततो गता च सा चैव तुष्टोऽभूदन्तकस्तदा ।
भूयो भूमितलं प्राप्य तदैव च तथा सती ॥
सा तत्र तद्व्रतञ्चक्रे दानं होमं यथाविधि ।
संपूर्णे तु व्रते तत्र प्रतिष्ठामाचरत् सती ॥
ददौ द्वादशविप्रेभ्यो दानानि द्वादशानि च ।
चत्वारि जलपात्राणि वस्त्रेण सहितानि च ॥
दानानि च ततो दत्त्वा तत्सच्छत्रकघटास्तथा ।
आसनानि च चत्वारि पादुकासहितानि च ॥
दक्षिणान्तु ततो दत्त्वा वस्त्राणि विविधानि च।
तद्व्रतञ्च सुसम्पन्नं विष्णुहस्तेऽर्पयत्ततः ॥
एवं कृत्वा व्रतं साध्वी द्रौपदी सुसमाहिता ।
अन्तकालं समासाद्य सा गता वैष्णवं पुरम् ॥
इत्युक्त्वा लोमशेनाथ कन्या मालावती तथा ।
कृत्वा चैव व्रतं साध्वी देवाराधनपूर्व्वकम् ॥
सा नित्यं गर्गरीं दत्त्वा सभोज्यदक्षिणान्विताम् ।
देवोद्देशेन विप्राय श्रद्धया प्रत्यपादयत् ॥
एवं या कुरुते नारी पुत्त्रपौत्त्रसमन्विता ॥

पुस्तकान्तरे ।

‘एवं करोति या नारी नरो वा व्रतमुत्तमम् ।’
इति वा पाठः ।

आयुरारोग्यमैश्वर्य्यं श्रियञ्च लभते सुखम् ।
अन्ते याति परं स्थानं यत्र देवो निरञ्जनः ॥”

इति भविष्यपुराणोक्ता धर्म्मघटव्रतकथा समाप्ता ॥

क्वचित् क्वचित् पद्धतौ विष्णुधर्म्मोत्तरयमपुराणोक्ता च लिखिता ॥

धर्म्मचक्रः, पुं, (धर्म्मस्य चक्रं समूहो यत्र ।) बुद्धः । इति शब्दरत्नावली (धर्म्मस्य चक्रं समूहः । धर्म्मसमूहे, क्ली । यथा, महाभारते । १ । १०६ । १४ ।
“भीष्मेण विहितं राष्ट्रे धर्म्मचक्रमवर्त्तत ॥”
अस्त्रविशेषः । यथा, हरिवंशे । २२६ । ७ ।
“धर्म्मचक्रं महाचक्रमजितं नाम नामतः ॥”)

धर्म्मचक्रभृत्, पुं, (धर्म्मचक्रं धर्म्मसङ्घं बिभर्त्तीति । भृ + क्विप् । तुगागमश्च ।) जिनः । इति धरणिः ॥

धर्म्मचारिणी, स्त्री, (धर्म्मं चरतीति । चर + णिनि + ङीप् ।) जाया । इति शब्दरत्नावली ॥

धर्म्मचिन्तनं, क्ली, (धर्म्मस्य चिन्तनं भावना ।) धर्म्मचिन्ता । इति हेमचन्द्रः । ६ । १७ ॥

धर्म्मचिन्ता, स्त्री, (धर्म्मस्य चिन्ता भावना ।) पुण्यभावना । तत्पर्य्यायः । उपाधिः २ । इत्यमरः । १ । ७ । २८ ॥

धर्म्मज्ञः, त्रि, (धर्म्मं जानातीति । ज्ञा + कः ।) धर्म्मज्ञानविशिष्टः । यथा,—
“धर्म्मज्ञश्च कृतज्ञश्च ह्रीनिषेवी दृढ़व्रतः ॥”
इति विराटपर्व्व ॥

धर्म्मणः, पुं, (धर्म्मेणैव धार्म्मिकवदित्यर्थः नमतीति । नम + अन्येभ्योऽपीति डः ।) वृक्षभेदः ।